# RAMAKRISHNA MISSION VIDYAMANDIRA

(Residential Autonomous College affiliated to University of Calcutta)

**SECOND YEAR [2017-20]**
**B.A./B.Sc. THIRD SEMESTER (July – December) 2018**
**Mid-Semester Examination, September 2018**

Date : 24/09/2018 — **SANSKRIT (Honours)**
Time : 11 am – 1 pm — Paper : III — Full Marks : 50

1. दण्डोद्भवमाहात्म्ययोर्मनुमुनिमतमुपन्यसनीयम्। 10

2. पद्यमेकं वङ्गवाण्यानूद्यताम्। (1 × 4)
   क) व्यसनस्य च मृत्योश्च व्यसनं कष्टमुच्यते।
   व्यसन्यधोऽधो व्रजति स्वर्यात्यव्यसनी मृतः।।
   ख) एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम्।
   कुलं दहति राजाग्निः सपशुद्रव्यसञ्चयम्।।

3. यथाभिलाषं सूत्रद्वयं व्याख्येयम्। (2 × 5)
   क) स दोषगुणालंकारहानादानाभ्याम्।
   ख) शास्त्रतस्ते।
   ग) अरोचकिनः सतृणाभ्यवहारिणश्च कवयः।
   घ) काव्यं सद् दृष्टाऽदृष्टार्थं प्रीतिकीर्तिहेतुत्वात्।

4. साहित्यदर्पणानुसारं सोदाहरणं निरूप्यताम् अलंकारद्वयस्वरूपम्। (2 × 5)
   क) वक्रोक्तिः।
   ख) रूपकम्।
   ग) यमकम्।
   घ) पुनरुक्तवदाभासः।

5. वाक्येनैकैकेन स्वाभिलषितप्रश्नाष्टकं समाधेयम्। (8 × 2)
   क) ...लोको राज्ञा दण्डेन पालितः ...इत्यत्र निम्नरेखाङ्कितपदे सकारणं विभक्तिर्निर्णेया।
   ख) तीक्ष्णदण्डेऽर्थशास्त्रकारमतं किमस्ति? मृदुदण्डे च किम्?
   ग) कति वेदाङ्गानि? कानि तानि?
   घ) बलीयान् अबलं हि ग्रसते ... इत्यत्र निम्नरेखाङ्कितपदे सविग्रहं समासो निर्णेयः।
   ङ) कीदृशो दण्डः प्रजा धर्मार्थकामैर्योजयति?
   च) भूतरक्षणं कस्य स्वधर्मः? प्रतिग्रहश्च कस्य?
   छ) कौटिल्यमतानुसारं विद्याः कतिविधाः? कास्ताः?
   ज) मनुशिष्याणां नयानुसारं विद्यावैविध्यं यथायुक्ति प्रदर्शनीयम्।
   झ) कौटिल्यमतानुसारं विद्यासामान्यलक्षणं किम्?
   ञ) कौटिलीयार्थशास्त्रे कति प्रकरणानि सन्ति? कति चाधिकरणानि?
   ट) गणपतिशास्त्रिमतानुसारमर्थशास्त्रकारस्य नाम किम्? कस्माद्धेतोः?
   ठ) आन्वीक्षिक्याः कोपयोगिता?

———— × ————